Shodh Drishti (An International Peer Reviewed Multidisciplinary Refereed Research Journal) Impact Factor : 8.125
Vol. 16, No. 10, October 2025 ISSN : 0976-6650

# मानवजीवने पुराणानां महत्त्वम्

**डॉ0 प्रत्यूष वत्सला द्विवेदी**
एसोसिएट प्रोफेसर, संस्कृत विभाग, डी0बी0एस0 कॉलेज, कानपुर

पुराणानि भारतीयायाः संस्कृतेः सभ्यतायाः भारतीय जन–जीवनस्य च प्रदीपा' सन्ति। एतैरेव भारतीया संस्कृतिः सभ्यता च यथातथ्येन अवगन्तुं शक्येते। पुराणेषु भारतीयानां पुरातनव्यावहारिको ज्ञाननिधिः मानवजीवनस्य च परमं सत्यं विराजेते। अतएव भारतीयवाङ्मये पुराणानां विशेष–समादरोऽस्ति। पुराणानां विषये भागवतमेवं भणति–

''इतिहास पुराणं च पंचमो वेद उच्यते।।''

विषयेऽस्मिन् वायुपराणम् एवं ब्रवीति यत चतुर्वेदविशारदोऽपि पुराणज्ञानविहीनो बुधो विचक्षणपदं प्राप्तुं नहिर्ति–

''यो विद्याच्चतुरो वेदान् साङ् गोपनिषदो द्विजः।
न चेत् पुराणां स विद्यान्नैव स स्याद् विचक्षणः।।''[1]

वेदानाम् अर्थज्ञानाय पुराणानाम् अपेक्षास्ति –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदा मामयं प्रहरिष्यिति।।[2]

पुराणशब्दार्थविमर्श :– पुराणशब्दो बुधैर्बहुधा व्याकृत :– 1. पुराभवं पुराणम्–पुराट्यु (अन), तुट् च। 2. पुराणम्–आख्यानम्। 3. यस्मात् पुरा अनति तदिदं पुराणम् 4. पुरार्थेषु आनयतीति पुराणम्। 5. पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम। (वायुपुराणम्)। 6. विश्वसृश्टेरितिहासः पुराणम्। 7. पुराभवं पुराणं स्याद् धर्मार्थकाममोक्षदम्। श्रेयसे यद्मानवानां सर्वाभ्युदयकारकम्।[3]

पुराणं पंचलक्षणम् – विष्णुपुराण प्रतिपाद्यविषयमाधारीकृत्य पुराणम् एवम् आचक्षते–

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पंचलक्षणम्।।[4]

पुराणानां प्रतिपाद्यविषया :– पुराणेषु प्राधान्येन देवानाम् उपासनायपदिश्यते। प्रायेण ब्रह्मविष्णु–महेशादिदेवानां कालीलक्ष्मीसरस्वतीप्रभृतिदेवीनां च सर्वोत्कृष्टता प्रतिपादितास्ति। एतेषु सृष्टेः प्रलयस्य च वर्णनम्, देवर्षिराजवंशानिरूपणम्, मनो मन्वन्तरस्य च प्रतिष्ठापनम् प्रसिद्धतीर्थस्थानानां तीर्थयात्रादीनां च वर्णनम्, व्रतजपोपवासादीनां चानुष्ठानम्, धर्मदर्शनराजनीति सदाचारादिविषयाणां विवेचनम्, व्याकरणकाव्यज्योतिषशास्त्रा युजुर्वेदादिशास्त्रीयविविधविषयाणां मन्त्रयन्त्रतन्त्रकलाविज्ञानविषयैः सह पारिवारिक सामाजिकार्थिक राजनैतिक विषयाणामपि सम्यग् वर्णनं कृतमस्ति। पुराणानां राष्ट्रप्रेम विख्यातमस्ति। एषां मातृभूमिभक्तिरनुपमेया। भारतवसुन्धरां प्रशंसन्तो न सामान्या जना अपितु दिवौकसाः किल गीतकानि गायन्ति। यथोक्तं विष्णुपुराणे–

गायन्तिदेवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते
भवन्ति भूयो मनुजाः सुरत्वात्।।[5]

पुराणानि भारतीयजीवनं सम्यक् प्रभावयन्ति। पुराणेषु तद् विधानं वर्तते येन समाजस्य परिपूर्णता सिद्धयति, मानवजीवनं च पुष्पवत् प्रफुल्लायते, विधेयर्द दिव्यं विधानं वर्तते, मानवानां च यत् परमं मंगलं कथ्यते तत्सर्वं पुराणेसु विद्योतते। यथोक्तं च पुराणपरिजाते–

पूर्णता या समाजस्य संराजते
यच्च दिव्यं विधानं विधेवर्तते।
मानवानां परं मंगलं यच्च यत्।
तत्तु सर्वं पुराणेषु संशोभते।।[6]

पुराणेषु यद्ज्ञानं वर्तते तज्जनानाम् अज्ञानजन्यम् अन्धकाररूपं मोहं निरस्य ज्ञानप्रकाशं प्रस्तौति, तेन मार्गः प्रशस्तो भवति, मानवजीवनस्य। एवं पौराणिकं ज्ञानं मानवानां कृते प्रशस्यतमं वर्तते। नूनं पुराणविद्या धरायाः चिद्रसः सा च धरायाः सौभाग्यशोभेव राजते, तत्र च सर्वे गुणाः सम्भूय शोभन्ते।

पुराणेषु राष्ट्रिया चेतना सर्वथा विराजते। तत्रा मानवींय लोकोत्कृष्टं मूल्यं वर्तते। पुराणानां प्रसादैः मानवीयमंगलानां द्रुमः सद्यएव पुश्पायते

राष्ट्रिया चेतना चात्र संराजते
मानवीयं सुमूल्यं तथा रक्ष्यते।
जायते मानसे पुण्ययोगः परः
मंङ्, गलानां द्रुमो येन पुष्पायते।।

पुराणेषु, धर्मेण सहैव कर्मणः शिक्षा दीयतें। अत्र धर्मस्य महत्त्वं बहुधा प्रतिपादितमस्ति। जीवने सर्वत्र साफल्यार्थ धर्मस्य आश्रयः करणीयः। धर्मे विना मानवः पशुतुल्यो भवति। धर्मयोगेन, दानवोऽपि देवायते। पुराणेषु कर्म–योगस्य बहुधा दानवोऽपि देवायते। पुराणेषु कर्म–योगस्य बहुधा प्रशंसा कृतास्ति। अत एव तत्त्वपारिजाते पुराणप्रसंगे कथितमस्ति –

देहिमे कर्मपपंड्कं लभ्स्वाम्बुजम्
सेवया कर्दमो नाम पद्मायते।
कर्म मे चेतना पुष्पितं ते वनं
कर्म मे जीवनं कर्म ते जीवनम्।।
कर्मपूजा यया मंगलं जायते
कर्मयोगेन राष्ट्रं सदा वर्द्धते।[7]

पुराणेषु पुरुषार्थसिद्धयर्थं बहवो विषयाः निरूपिताः सन्ति। अत्र सदाचारस्य वैशिष्टयं बहुधा प्रतिपादितम् अस्ति। पुराणानाम् अनुशीलनेन राष्ट्रसेवाव्रतं सिद्धयति तेन च राष्ट्रसमृद्धिभावो वर्द्धते। तैश्च सुविधा वितीर्यते लोकसेवारसः, त्यागभावस्य च प्रेरणा सन्तनुते तेन च भेददृष्टिः स्वतो नष्यति, राष्ट्रभक्तिः, तपोवृत्तिः, सत्प्रवृत्तिश्च सर्वथा वर्द्धन्ते।

पुराणानाम् अध्ययनेन ज्ञानोदयो भवति। तेन ज्ञानाग्निना कल्मषं दग्धं भवति। तत्त्वज्ञानेन मानसं निर्मलं जायते। येन परा शान्तिरासाद्यते। पुराणावाणी सततं सुधां वर्षति। यया खिन्नोऽपि मानवः परमं प्रसादं प्राप्नोति। पुराणानि वेदविज्ञानयोगैः विराजन्ते, तत्र सांख्यवेदान्तदिविधाः शोभन्ते। यन्तु सत्यं शिवं सुन्दरं कथ्यते तत्सर्वं पुराणेषु विलोक्यते। पुराणेषु विश्वबन्धुत्वभावः, मुक्तिबोधः, सर्वकल्याणभावना, राष्ट्रियचेतना, मानवीयमूल्यरक्षा–प्रभृतयो विषया सम्यक् निरूपिताः सन्ति। यथोक्तं पुराणचिन्तामणौ–

विश्वबन्धुत्वभावोऽत्रसंदृश्यते
मुक्तिबोधस्य मार्गस्तथा दिश्यते।
यन्तु सत्यं शिवं सुन्दरं कथ्यते
तन्तु सर्वं पुराणेषु संदृश्यते।।[8]

धर्मपरिपालनेन मानवजीवनं सम्पूर्णं साफल्यं लभते। संसारे धर्मात् परं किंचिदपि नास्ति। धर्म एवं मानवानां परमः सखा। धर्म मानवं सदा रक्षति, तं कर्तव्यमपि स्मारयति। अयं धर्म एवं मानवानां तथा सखास्ति यस्तस्य निधनेऽपि अनुयाति। धर्मं विहाय अन्यत् सर्वं शरीरेण सहैव नश्यति। यथोक्तम् –

एक एव सुह्रद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति।।

अस्य धर्मस्य पुराणेषु व्यावहारिकं रूपं निरूपितमस्ति। पुराणानि गुरुरिव सदाचारम् उपदिशन्ति। एतेषाम् अभिमतमस्ति यत् सदाचारेण मानवानां ह्रदयानि पवित्राणि जायन्ते। सदाचारी जनः देवैरपि पूजयते, तस्य सर्वत्रा समादरो भवति। एतेन जनः परिवारस्य, समाजस्य, राष्ट्रस्य च समुन्नतिं कर्तुं प्रभवति। सदाचारी पुरुषः शतं वर्षाणि जीवति–

सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।
श्रद्दधानोऽनसूयश्चय शतं वर्षाणि जीवति।।

कश्चिदपि समाजः सत्यं बिना समुन्नतिं कर्तुं नार्हति। अतः सत्यस्य महत्त्वं तुम सुस्पष्टमेव। पुराणेषु सत्यस्य विषये बहुधा निरुपितमस्ति। अत्र तु तावदेवं प्रतिपादितमस्ति सत्यमेव परमेश्वरोऽस्ति। सत्यसम्भाषणेन भवगतः प्राप्तिः भवितुमर्हति। नूनम् अतुल्योऽस्ति सत्यस्य महिमा। सर्वं वै सत्ये प्रतिष्ठितम् अस्ति–

सत्येन सूर्यस्तपति, पृथ्वी सत्ये प्रतिष्ठिता।
सत्येन वायवो वान्ति, सर्वं सत्ये प्रतिष्ठित्म।।

पुराणेषु प्रायः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिप्रभृत्तिसत्त्वानां निरूपणं कृतमस्ति। एभिः मानवः सर्वविधं कल्याणं प्राप्तुं शक्नोति। तत्र अहिंसासत्यास्तेयब्रह्मचर्या– परिग्रहाः यमाः। तत्र अहिंसा तु परमधर्मरूपेण प्रतिष्ठिता। पुराणानि परोपकारं प्रायः समुपदिशन्ति। कथितमप्यस्ति–

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

पुराणानां सुदृढोऽयं विश्वासो यत् परोपकारेण मानवजीवनं सफलं भवति। परोपकारेण जनः परमं फलं प्राप्नोति। यज्ञशतैरपि तद्वत् पुण्यं नासाद्यते, अतो जनैः प्राणैरपि धनैरपि परोपकारः कर्त्तव्यः–

परोपकारः कर्तव्यः प्राणैरपि धनैरपि।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि।।

पुराणेषु तपसां महत्त्वं सम्यक् प्रतिपादितमस्ति। तत्र कथितमस्ति तपसा हि सर्वं साध्यम्। तपो हि दुरतिक्रमः। तत्र शीलस्यापि प्रशंसा कृतास्ति। तत्रा प्रतिपादितमस्ति यत् सर्वेषु भूषणेषु शीलम् एवं परं भूषणं वर्तते। यत्रा शीलं विराजते तत्रा धर्म तेजो बलं च निवसन्ति। शीलवतां पुरुषा किंचिद्पि कार्यम् असाध्यं नास्ति। शीलेन त्रयो लोकाः जेतुं शक्यन्ते यथोक्तमस्ति–

शीलेन हि त्रयो लोका शक्या जेतुं न संशयः।
नहि किंचिदसाध्यं वै लोके शीलवतां भवेत्।।

पुराणानि सामान्यभारतीयजनानां धार्मिक सांस्कृतिकजीवनस्य आश्रयतत्त्वानि सन्ति। प्रकारान्तरेण एतानि लौकिकवेदरूपेण ख्यातानि सन्ति। विदुषां विशिष्टजनानां च कृते यत् स्थानं वेदानाम् अस्ति सामान्यजनानां कृते तदेव स्थानं पुराणानाम् अस्ति। पुराणानां परायणं श्रवणं च भारतीय धार्मिकजीवनस्य एकं प्रधानम अंग वर्तते। प्राचीन भारतीय विचाराचार सिद्धान्तानां पुराणेषु व्यावहारिकं प्रतिपादनं वर्तते। पुराणसाहित्यं मानवजीवनं सर्वाधिकं प्रभावयति। पुराणानां वर्ण्यविषयस्रोतासि वेदा एव। भारतीय–धर्म–दर्शन–संस्कृति–सदाचार–सामाजिक–राजनीतिक–जीवन–सम्बन्धिनो विषयाः पुराणेषु विराजन्ते। अत्र मानवजीवनस्य कृते अध्यात्म–ब्रह्म–सृष्टि–विद्यादीनां सम्यग् निरूपणं कृतमस्ति। श्रीमद्भागवत् पुराणस्य एतत् कथनं मानवजीवनस्य कृते सर्वथा प्रासंगिक वर्तते।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेवभूय एवाभिवर्द्धते।।[9]

श्रीमद्भागवतं प्रशान्तं मानवजीवनम् एवम् अभिनन्दति प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः। न व्यथितिं न ह्रष्यन्ति यत आत्मा गुणाश्रयः।।[10]

पुराणैः मानवजीवनस्य कृतेतदमृतं दीयते यद् लोके दुर्लभम् अस्ति। पुराणानाम् पाठेन मानवमानसे सात्त्विकता जायते। तथा तेषाम् अन्तःकरणं परिशुद्धो भवति। तेन सत्यं समुदेति, तेन च मानवमूल्यानि रक्षितानि जायन्ते। नूनं पुराणविद्यया चेतः प्रसीदति। सत्येव फुल्लं नवं प्रसूनं सौरभैः शोभते, यशः सौरभैः सज्जनाः शोभन्ते, पुनश्च यैर्जनैः जीवने पुराणं सेव्यते ते नूनं संसारे परां निवृतिं लभन्ते। चन्द्रस्य शीतला चन्द्रिका भाँति, तरुणां छाया शीतप्रदावर्तते। गङ्गम्भः पवितत्रां प्रयच्छिति, एवमेव पुराणानां सद्ज्ञानं शीतलतां पवित्रतां च प्रददाति। सत्यमेव कथितमस्ति–

सम्प्राप्य मानुषं देहं देवानामपि दुर्लभम्।
पुराणं ये न सेवन्ते तेषां जन्म निरर्थकम्।।[11]

पुराणानां विज्ञानेन भारतं भुवि ख्याते वर्तते। पुराणेषु यद् विशिष्टं मानवीय विज्ञानं विलसति तेन लो मानवजीवने कल्याणपरम्परा वितन्यते।

पुराणानां प्रभावो जनमानसे दृश्यते। तज्जानं सम्प्राप्य मानवानां मानसं सौगन्धिकं यथा फल्लति तच्च सात्त्विकं नवं पिंगल परागं धत्ते। तस्य ज्ञानरूपं सितं सुस्मितं सवीक्ष्य लोके को न मोदते?

पुष्पस्तबकैः पादपः शोभते, पद्मपुंजैः स्वच्छं शीतलं सलिलं शोभते, मल्लिकायाः प्रफुल्लं पुष्पं दीव्यति तथैव ज्ञानविज्ञानयोगैः पुराणानि संशोभन्ते। एषा भारत धरा धन्या, धन्याश्च वयं यत्र पौराणिकः प्रसादः स्यन्दते। पुराणविद्या मंगलां माता, गुणानां निधिः, विशिष्टविभूतिभूषिता च। पौराणिकं ज्ञानं विभुत्वं चाभिलक्ष्य तत्त्वचिन्तामणे कथितमस्ति–

विश्ववबन्धं विभुत्वं भवेत्त परं
मंगलायैव सूयात् प्रवृतिश्च सा।
भारते मातु पौराणिकं तद्वचः
मानवानां शुभं सर्वथा सम्भवेत्।।[12]

अन्यच्च–

राजतां राजतां भारते भारती
वर्द्धतां वर्द्धतां मंगलं भारते।
लोकवन्द्या पुराणस्य वाणी भवेत्
शंकरश्चैव कुर्यात् शुभं सर्वदा।।

**सन्दर्भ ग्रन्थ सूची :**

1. वायुपुराणम्, 1/1/180
2. म.आ.आ.प., 1/267
3. तत्त्वपारिजातम्, 19/9
4. विष्णुपुराणम्
5. विष्णुपुराणम्
6. पुराणपारिजातम्, 1/51
7. तत्त्वपारिजातम्, 7/25, 26
8. पुराणचिन्तामणिः, 5/27
9. श्रीमद्भागवतम्, 9/19/14
10. श्रीमद्भागवतम्, 1/18/49
11. पुराणपारिजातम्, 2/21
12. तत्त्वचिन्तामणिः, 7/17